Course- 02 - तर्कसङ्ग्रहः श्रेयोऽङ्कः- 4

**पाठ्यपरिचयः** – भारतीयन्यायशास्त्रे प्रवेशार्थम् इदं पाठ्यं परिकलितं विद्यते । एतस्मिन् पाठ्यविषये न्यायनये प्रवेशं प्राप्तुं समुत्सुकानां कृते सरलया रीत्या न्यायदर्शनस्य प्रमाणनिरूपणं प्रमाणप्रक्रिया प्रामाण्यवादः प्रमेयाणि च निरूपितानि सन्ति । संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति । तत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं नाम मीमांसा, प्रमाणशास्त्रं नाम न्यायशास्त्रम् । तदेतस्य प्रमाणशास्त्रस्य सरलतया बोधनाय श्रीमता अन्नम्भट्टेन तर्कसङ्ग्रहः विरचितः।

**अधिगमपरिणामः** – एतस्य पाठ्यस्य अध्ययनेन छात्राः

- न्यायवैशेषिकदर्शनस्य स्वरूपं प्रयोजनं च ज्ञातुं समर्थाः भविष्यन्ति।
- न्याय-शास्त्रस्य तर्कप्रणालीं वक्तुं शक्ष्यन्ति ।
- पदार्थभेदान्, लक्षणानि च वक्तुं शक्ष्यन्ति।
- प्रमाणस्य लक्षणं प्रक्रियां च अवगन्तुं योग्याः भविष्यन्ति ।
- न्यायशास्त्रस्य सिद्धान्तान् कथयितुं प्रभविष्यन्ति ।

**पाठ्यांशः** –

| पाठ्यांशः | विवरणम् |
|---|---|
| १. **पदार्थबोधः** | न्यायवैशेषिकदर्शनपरिचयः, भारतीयतर्कप्रणाली, मङ्गलवादः, न्यायस्य त्रिविधा प्रवृत्तिः- उद्देशः, लक्षणम्, परीक्षा च। पदार्थानां विभागः - द्रव्यम्, गुणाः कर्म, सामान्यम्, विशेषः, समवायः, अभावः। |
| २. **पदार्थलक्षणबोधः** | पृथिवीनिरूपणम्, जलनिरूपणम्, तेजोनिरूपणम्, वायुनिरूपणम्, आकाशनिरूपणम्, कालनिरूपणम्, दिङ्निरूपणम्, आत्मनिरूपणम्, मनोनिरूपणम्। गुणनिरूपणम् |
| ३. **प्रमाणपरिचयः** | प्रत्यक्षप्रमाणलक्षणम्, इन्द्रियार्थसन्निकर्षः, प्रमाणफलम्, अनुमानलक्षणम्, व्याप्तिः, परामर्शः, हेत्वाभासाः |
| ४. प्रमाणबोधः | उपमानलक्षणम्, उपमानप्रक्रिया, शब्दप्रमाणलक्षणम्, आकांक्षा, योग्यता, सन्निधिः, शाब्दबोधप्रक्रिया, अवशिष्टगुणनिरूपणम्, कर्मनिरूपणम्, सामान्यनिरूपणम्, विशेषनिरूपणम्, समवायनिरूपणम्, अभावनिरूपणम्। |

**प्रायोगिकम्** – अस्मिन् पाठ्ये छात्रैः करणीयाः प्रयोगाः अभ्यासाश्च -

- तर्कसङ्ग्रहस्य मूलपङ्क्तीनाम् उच्चारणाभ्यासः
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम् ।
- उदाहरणवाक्यम् अवलोक्य हेत्त्वाभासान्वेषणम् ।
- अनुमानवाक्येषु पक्ष-सपक्ष-हेत्त्वाद्यन्वेषणम् ।

**परियोजना** –

- कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च ।
- न्यायशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना ।

**स्वाध्यायसामग्री** –

- तर्कसङ्ग्रहः - अन्नम्भट्टः, चौखम्बा प्रकाशन, वाराणसी ।
- तर्कसोपानम् - राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः ।
- न्यायस्य भाषा संस्कृतम् - संस्कृतसंवर्द्धनप्रतिष्ठानम्, नवदेहली ।